# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## अच्सन्धिप्रकरणम् (३)

२३.०८.२०१०

# पुनरावर्तनम्

- स्थानिवदादेशोऽनल्विधौ
- अचः परस्मिन् पूर्वविधौ
- न पदान्त...
- सुध्युपास्यः

# ५५. नादिन्याक्रोशे पुत्रस्य (८.४.४८)

- चत्वारि पदानि ।
- न, आदिनी, आक्रोशे, पुत्रस्य ।
- 'अचो रहाभ्यां द्वे' इत्यतः द्वे इति, 'यरोऽनुनासिकेऽनुनासिको वा' इत्यतः यरः इति च अनुवर्तते ।
- पुत्रशब्दस्य न द्वे स्तः आदिनीशब्दे परे आक्रोशे गम्यमाने ।

# पुत्रादिनी त्वमसि पापे ।

प्     उ     त्     र्     अ

अच्     यर्     न अच्

आक्रोशे किम् – तत्त्वकथने द्विर्वचनं भवत्येव । पुत्त्रादिनी सर्पिणी ।

# तत्परे च (वा) ।

- आदिनीशब्दपरके पुत्रशब्दे परे पुत्रशब्दावयवस्य यरः न द्वित्वम् ।

  (पुत्रादिनी-शब्दे परे इत्यर्थः)
- पुत्रपुत्रादिनी त्वमसि पापे ।

# वा हतजग्धयोः (वा)

- हतशब्दे जग्धशब्दे च परे पुत्रशब्दावयवस्य यरः वा द्वित्वम् ।
- पुत्त्रहती – पुत्रहती ।
- पुत्त्रजग्धी – पुत्रजग्धी ।

# ५६. त्रिप्रभृतिषु शाकटायनस्य (८.४.५०)

- पदद्वयम् ।
- ’अचो रहाभ्यां द्वे’ इत्यतः द्वे इति, ’नादिन्याक्रोशे पुत्रस्य’ इत्यतः ’न’ इति च अनुवर्तते ।
- शाकटायनस्य मते द्वित्वं न भवति ।
- पाणिनीयमते तु भवति । अर्थात्, विकल्पः ।
- त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम् ।

इन्न्द्रः – इन्द्रः

इ न् द् र् अ

अच् यर् न अच्

राष्ष्ट्रम् – राष्ट्रम् ।

# ५७. सर्वत्र शाकल्यस्य (८.४.५१)

- पदद्वयम् ।
- 'अचो रहाभ्यां द्वे' इत्यतः द्वे इति, 'नादिन्याक्रोशे पुत्रस्य' इत्यतः 'न' इति च अनुवर्तते ।
- द्वित्वं न । शाकल्यस्य आचार्यस्य मते क्वापि द्वित्वं न भवति ।
- अर्कः, ब्रह्मा । ('अचो रहाभ्यां द्वे' इत्यनेन द्वित्वस्य प्राप्तिः) ।
- पाणिनिमते अर्क्कः, ब्रह्म्मा ।

| | | | |
|---|---|---|---|
| अ | र् | क् | अः |
| अच् | रेफः | | यर् |
| अ | र् | क्क् | अः |

| | | | | | |
|---|---|---|---|---|---|
| ब् | र् | अ | ह् | म् | आ |
| | | अच् | हकारः | यर् | |
| ब् | र् | अ | ह् | म्म् | आ |

# ५८. दीर्घादाचार्याणाम् (८.४.५२)

- पदद्वयम् ।
- दीर्घात्, आचार्याणाम् ।
- ’अचो रहाभ्यां द्वे’ इत्यतः द्वे इति, ’नादिन्याक्रोशे पुत्रस्य’ इत्यतः ’न’ इति च अनुवर्तते ।
- **द्वित्वं न ।** केषाञ्चिदाचार्याणां मते दीर्घात्परस्य यरः द्वित्वं न भवति ।
- **दात्रम्, पात्रम् ।** पाणिनिमते दात्त्रम्, पात्त्रम् ।

| | | | | | |
|---|---|---|---|---|---|
| द् | आ | त् | र् | अ | म् |
| | अच् | यर् | न अच् | | |
| द् | आ | त्त् | र् | अ | म् |

# ५९. अचो रहाभ्यां द्वे (८.४.४६)

- पदत्रयम् ।
- 'यरोऽनुनासिकेऽनुनासिको वा' इत्यतः यरः इति, वा इति च अनुवर्तते ।
- अचः – पञ्चमी = अचः पराभ्याम् (तस्मादित्युत्तरस्य)
- रहाभ्याम् – पञ्चमी = रेफ-हकाराभ्यां परस्य (तस्मादित्युत्तरस्य)
- यरः – षष्ठी = यर्-वर्णस्य स्थाने (षष्ठी स्थानेयोगा)
- द्वे – प्रथमा = विधेयः = द्वे स्तः ।
- अचः पराभ्यां रेफ-हकाराभ्यां परस्य यरः द्वे वा स्तः ।

हरि+अनुभवः

हर्   य्   अनुभवः   ('इको   यणचि ' इति   यणादेशः   )

ह्   अ   र्   य्   अनुभवः

अच्   रेफः   यर्

ह्   अ   र्   य्य्   अनुभवः

- नहि अस्ति
- नह् य् अस्ति ('इको यणचि' इति यणादेशः)
- नह् य्य् अस्ति ('अचो रहाभ्यां द्वे' इति द्वित्वम्)

# ६०. हलो यमां यमि लोपः (८.४.६४)

- चत्वारि पदानि ।
- 'झयो होऽन्यतरस्याम्' इत्यतः 'अन्यतरस्याम्' इति अनुवर्तते ।
- हलः – पञ्चमी = हलः परेषाम् (तस्मादित्युत्तरस्य)
- यमां – षष्ठी = यम्-वर्णानां स्थाने (षष्ठी स्थानेयोगा)
- यमि – सप्तमी = यम्-वर्णे परे (तस्मिन्निति निर्दिष्टे पूर्वस्य)
- लोपः – प्रथमा = विधेयः = लोपः स्यात्
- हलः परस्य यमः लोपः स्याद् वा यमि ।

| | | | | | |
|---|---|---|---|---|---|
| ह् | अ | र् | य् | य् | अनुभवः |
| | | हल् | यम् | यम् | |
| ह् | अ | र् | | य् | अनुभवः |

हर्यनुभवः

इति लोपपक्षे, द्वित्वाभावपक्षे च एकयं रूपं तुल्यम् ।

## लोपारम्भफलं तु 'आदित्यो देवता अस्येत्यादित्यं हविः' इत्यादौ ।

- आदित्यो देवता अस्य
- आदित्य ण्य ('दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ' इति ण्य -प्रत्ययः )
- आदित्य य ('चुटू' इति णकारस्य इत्संज्ञा, 'तस्य लोपः')
- आदित्् य ('यस्येति च' इति अकारस्य लोपः)
- आदि त् य् य् अ
- हल् यम् यम्
- आदि त् य् अ
- आदित्य

| | | | | |
|---|---|---|---|---|
| माहा | त् | म् | य् | अम् |
| | हल् | यम् | यम् | |

’यमां यमि’ इति यथासंख्यविज्ञानात् नेह – माहात्म्यम्, तादात्म्यम् ।

# १२८. यथासंख्यमनुदेशः समानाम् (१.३.१०)

पदत्रयम् ।

समसम्बन्धी विधिः यथासंख्यं स्यात् ।

य् य्

व् व्

र् र्

ऌ ऌ

ञ् ञ्

म् म्

ङ् ङ्

ण् ण्

न् न्

# ६१. एचोऽयवायावः (६.१.७८)

- पदद्वयम् । एचः, अय्-अव्-आय्-आवः । ’इको यणचि’ इत्यतः ’अचि’ इति अनुवर्तते ।
- एचः – षष्ठी = एचः स्थाने (षष्ठी स्थानेयोगा)
- अचि – सप्तमी = अचि परे (तस्मिन्निति निर्दिष्टे पूर्वस्य)
- अयवायावः – प्रथमा = विधेयाः = एते स्युः
- एचः क्रमाद् अय् अव् आय् आव् एते स्युः अचि ।

| | |
|---|---|
| ए | अय् |
| ओ | अव् |
| ऐ | आय् |
| औ | आव् |

हरे ए

हर्   ए   ए

एच्   अच्

अय्

हर्   अय्   ए

’अय्’ इति उपदेशः । ’हलन्त्यम्’ इति इत्संज्ञायाम्,

# ६२. तस्य लोपः (१.३.९)

- पदद्वयम् ।
- 'उपदेशेऽजनुनासिक इत्' इत्यतः 'इत्' इति अनुवर्तते ।
- तस्य इतः लोपः स्यात् ।
- इति यवयोर्लोपो न । उच्चारणसामर्थ्यात् । एवं च इत्संज्ञापीह न भवति ।

- विष्णवे

- नायकः

- पावकः